# न्यायमते अनुमानप्रमाणम्

**सुरजित् मण्डलः**


## प्रबन्धसारः

*मानाधीना मेयसिद्धिः अर्थात् प्रमाणमन्तरा प्रमेयस्य सिद्धिर्नैव सम्भवति। प्रमाणभेदविषये दार्शनिकानां विमतिदर्शनेऽपि प्रमाकरणं प्रमाणमिति लक्षणविषये विमतिर्नास्ति। प्रत्यक्षमेकमेव प्रमाणमिति चार्वाका वदन्ति। चार्वाकमतिरिच्य सर्वैरनुमानस्य सत्ता स्वीक्रियते। न्यायतन्त्रे प्रत्यक्षानुमानोपमानशब्दभेदेन चत्वारि प्रमाणानि सन्ति। प्रमापि प्रत्यक्षानुमित्युपमितिशाब्दभेदेन चतुर्विधा भवति। प्रत्यक्षप्रमायाः करणम् इन्द्रियम्। व्यापारश्च इन्द्रियार्थसन्निकर्षो भवति। अत एव इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं भवतीति प्रत्यक्षस्य लक्षणं साधितं सूत्रकारैः। प्रत्यक्षनिरूपणानन्तरमुपजीव्योपजीवकभावसङ्गत्या अनुमानस्य निरूपणं भवति। उपजीव्यत्वं कारणत्वमुपजीवकत्वञ्च कार्यत्वमिति। अत एव सूत्रकारैरुच्यते "तत्पूर्वकमनुमानं त्रिविधं – पूर्ववत् शेषवत् सामान्यतोदृष्टं च" अर्थात् प्रत्यक्षपूर्वमनुमानं त्रिविधं भवति। यत्र कारणेन कार्यस्यानुमानं तत्पूर्ववदनुमानम्। यथा मेघोन्नतिं दृष्ट्वा वृष्टिर्भविष्यतीति। यत्र कार्येण कारणस्यानुमानं भवति तच्छेषवद् अनुमानम्। यथा धूमं दृष्ट्वा वह्नेरनुमानम्। सामान्यतोदृष्टञ्च अन्यत्र दृष्टस्य यद् अन्यत्र दर्शनं तद् गतिपूर्वकमेव भवति। यथा आदित्यस्य। अनेन प्रकारेण प्राचीनैः अनुमानस्य त्रैविध्यमुपपादितम्।*

*प्रत्यक्षपरिकल्पितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका इति न्यायमनुसृत्य नव्यैः अनुमानस्य प्राधान्यं स्वीक्रियते। प्राचीनैरनुमानस्य यत्त्रैविध्यं प्रतिपादितं तत्स्वार्थानुमानपरम्। पञ्चावयवप्रयोज्यं यदनुमानं तत्परार्थानुमानमिति सिद्धान्तमभ्युपेत्य अनुमानस्य स्वार्थपरार्थभेदेन द्वैविध्यं नव्यैः स्वीकृतम्। न्यायाप्रयोज्यानुमानं स्वार्थानुमानं, न्यायप्रयोज्यानुमानं परार्थानुमानमिति। तत्र अनुमितिः प्रमा भवति, अनुमितौ व्याप्तिज्ञानं करणं परामर्शश्च व्यापारो भवति। तस्याः अनुमितेर्लक्षणं तु व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानम् अनुमितेर्लक्षणविषये आचार्याणां या मतिर्विद्यते तत्करणविषये च यो हि विचारो विद्यते तस्य विस्तृतविवेचनं प्रबन्धे मया अभिहितम्।*


"मानाधीना मेयसिद्धिः" अर्थात् प्रमाणमन्तरा प्रमेयस्य सिद्धिर्न भवतीत्यतः दार्शनिकैः प्रमाणतत्त्वमभ्युपगतम्। प्रमाकरणमिति प्रमाणलक्षणे दार्शनिकानां वैमत्याभावेऽपि प्रमाणसंख्याविषये महान् मतभेदः दरीदृश्यते। प्रत्यक्षप्रमाणस्य सर्ववादिसम्मतत्वात् चार्वाकैरपि प्रत्यक्षप्रमाणमभ्युपगतम्। चार्वाकमतम् अतिरिच्य प्रायः सर्वैः दार्शनिकैः अनुमानप्रमाणमपि उररीकृतम्। "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति अनुमानप्रमाणस्य महत्त्वमभिलक्ष्य प्रत्यक्षनिरूपणानन्तरं कार्यकारणभावसङ्गत्या तार्किकैरनुमानस्वरूपं निरूपितम्। उक्तं च मणिकारैः "प्रत्यक्षनिरूपणानन्तरं तदुपजीवकत्वात् बहुवादिसम्मतत्वाच्च अनुमानं निरूप्यते"[1] इति। सूत्रकारैः महर्षिभिः गौतमैरपि प्रत्यक्षलक्षणनिर्वचनानन्तरं सूत्रितं यत् "अथ तत्पूर्वकं त्रिविधमनुमानम् पूर्ववत्, शेषवत्, सामान्यतोदृष्टं च"[2] इति। अर्थात् प्रत्यक्षनिरूपणानन्तरं प्रत्यक्षपूर्वकं त्रिविधमनुमानं तैः निरूपितम्। तत्पूर्वकमिति कथनेन इदमेव बोध्यते यत् प्रत्यक्षस्यानुमानकारणत्वं फलितं भवति। प्रत्यक्षं च अत्र साध्यसाधनयोर्व्याप्यव्यापक-

[1] तत्त्वचिन्तामणिः, अनुमानखण्डः

[2] न्यायसूत्रम् १.१.५

भावसम्बन्धविषयकं साधनविषयकं च बोध्यं भवति। यथा प्रथमं महानसे वह्निधूमयोः व्याप्तिसम्बन्धप्रत्यक्षं भवति तत्पश्चात् च पर्वते धूमप्रत्यक्षं भवति। तदनन्तरं व्याप्तिस्मर्यमाणस्य पुरुषस्य पर्वतो वह्निव्याप्यधूमवानिति परामर्शः जायते। तादृशपरामर्शानन्तरं तस्य पुरुषस्य पर्वतो वह्निमान् इति अनुमितिर्जायते। उक्तं भाष्यकारेण "तत्पर्वकमित्यनेन लिगलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनं चाभिसम्बध्यते, लिङ्गलिङ्गिनोः सम्बद्धयोर्दर्शनेन लिङ्गिस्मृतिरभिसम्बध्यते, स्मृत्या लिङ्गदर्शनेन चाऽप्रत्यक्षोऽर्थोऽनुमीयते"[3] इति।

तत्र अनुमितिकरणमेवानुमानमिति अनुमानसामान्यलक्षणं न्यायज्ञैः भाषितम्। अनुमानपदार्थश्च अनुमीयते अनेन इति खरणव्युत्पत्तिपक्षः तात्पर्यटीकायां वाचस्पतिमित्रैः विपुलतया व्याख्यातः। सीत्रोक्ततत्पूर्वकमित्यस्य व्याख्यानावसरे न्यायमञ्जरीमकारैः "तत्पूर्वं कारणं यस्य तत् तत्पूर्वकमिति व्युत्पत्तौ निर्णयोपमानादौ अतिप्रसङ्ग इति ते द्वे प्रत्यक्षे पूर्व यस्येति"[4] व्युत्पत्तिरभ्युपगत्। तत्र प्रथमं चाविनाभावग्राहि प्रत्यक्षम्, द्वितीयञ्च लिङ्गदर्शनं ते द्वे प्रत्यक्षे अनुमानस्य कारणं स्तः, न तूपमानादेः कारणमिति। वस्तुतः लिङ्गविषयं ज्ञानं ज्ञानविषयीकृतं वा लिङ्गं प्रतिबन्धस्मरणसहितं प्रमाणम्। परोक्षः अर्थः लिङ्ग्यते गम्यतेऽनेनेति लिङ्गम्। लिङ्गमिदं पञ्चलक्षणम्। तानि च लक्षणानि पक्षधर्मत्वं सपक्षसत्त्वं विपक्षायावृत्तिरबाधितविषयत्वम् असत्प्रतिपक्षत्वञ्चेति। तथाहि जयन्तभट्टः –

"पञ्चलक्षणकाल्लिङ्गाद् गृहीतान्नियमे स्मृतेः।
परोक्षे लिङ्गिनि ज्ञानमनुमानं प्रचक्षते॥"[5]

तत्रेदमवधातव्यं यत् प्राचीनानां नये अनुमितौ करणं ज्ञायमानलिङ्गमेवानुमानम्। ज्ञायमानलिङ्गस्य करणत्वमिति निगदन्ति आचार्याः। अर्थात् ज्ञायते यत् तत् ज्ञायमानं वर्तमानव्याप्तिज्ञानविषयं लिङ्गमेवानुमानम्। ज्ञायमानलिङ्गस्य अनुमित्यकरणत्वे युक्तिं प्रदर्शयन्ति नव्याः – यदि ज्ञायमानलिङ्गस्य अनुमितिकरणत्वं स्वीक्रियते तर्हि भविष्यत्कालीनेन धूमेन इयं यज्ञशाला वह्निमती भविष्यति भाविधूमादित्यत्र भूतकालीनेन च धूमेन इयं यज्ञशाला वह्निमती आसीत् अतीतधूमादित्यत्र च अनुमितिर्न भवेत्, यतः वर्तमानकाले ज्ञायमानधूमस्याभावात् इति सर्वमतसिद्धः। अतः तादृशकारणाभावस्य वर्तमानकालीन-ज्ञायमानधूमाभावस्य सत्त्वेऽपि वह्न्यनुमित्या-त्मककार्यस्य सत्त्वाद् भवति व्यतिरेक-व्यभिचारः। व्यभिचारभयेन "व्यापारवदसाधा-रणकारणं करणमि"ति करणलक्षणमभ्युपेत्य नव्यैः व्याप्तिज्ञानस्य अनुमितिकरणत्वं स्वीकृतम्। उक्तं च विश्वनाथेन –

"व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्।
अनुमायां, ज्ञायमानं लिङ्गं तु करणं न हि।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा॥"[6] इति।

अत्रेदमपि बोध्यम् ये खलु फलाव्यवहितप्राक्क्षणावच्छिन्नं कारणं करणमिति वदन्ति तेषां नये लिङ्गपरामर्शोऽनुमानमिति। तथाहि

[3] न्यायभाष्यम्, पृ. २४

[4] न्यायमञ्जरी, अनुमानप्रकरणम्, पृ. १२५

[5] न्यायमञ्जरी, अनुमानप्रकरणम्, पृ. १०१

[6] कारिकावली, कारिका ६६-६७

ISSN : 2583-2271
Vol. - I, No. 1: 2021

अन्नंभट्टः–

"स्वार्थानुमिति-परार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्"[7] इति। केशवमिश्रेणापि लिङ्गपरामर्श एव अनुमानमित्यभाषि। "येन ह्यनुमीयते तदनुमानम्। लिङ्गपरामर्शेण चानुमीयते, अतः लिङ्गपरामर्शोऽनुमानम्"[8] इति। मणिकारैस्तु अनुमानस्वरूपमित्थं भाषितं यत् "तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानम् अनुमितिः, तत्करणमनुमानम्। तच्च लिङ्गपरामर्शे न तु परामृश्यमानं लिङ्गमिति।"[9]

वस्तुतः न्यायसूत्रकाराभिमतं पूर्ववत्-शेषवत्-सामान्यतोदृष्टभेदेन अनुमानं त्रिविधम्। वात्स्यायनेनायं विभागः आदृतः। उद्योतकारैः इयं प्रथमतया अन्वयव्यतिरेकी, अन्वयी, व्यतिरेकी चेति लिङ्गविशेषानुरोधादनुमानस्य त्रैविध्यमुक्तम्। वाचस्पतिमित्रैस्तु वीतावीतभेदेनानुमानस्य द्वैविध्यमभ्युपगतम्। तत्र वीतं पूर्ववत्सामान्यतोदृष्टभेदेन द्विविधम्। अवीतं पुनः
पुनः शेषवत् परिशेष अपरपर्यायं वेति तैः स्वीकृतम्। स्वार्थपरार्थभेदेन इयं प्रथमतया स्वभाष्ये प्रशस्तपादः अनुमानविभागमुपदर्शयत्। अयञ्च द्विविधभेदः नव्यनैयायिकैरपि अद्यावधि स्वीक्रियते विचार्यते च। उपर्युक्तमतेषु नव्यैरनुसृतः स्वार्थपरार्थविभागः सर्वथा न्यायशास्त्रे समादरणीयो भवतीति अनुमानस्य द्वैविध्यमेवाङ्गीकार्यमित्यलम्।

**सहायकग्रन्थाः**


- तत्त्वचिन्तामणिः (अनुमानखण्डः) – सम्पा. श्रीकामाख्यानाथ तर्कवागीशः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००६
- न्यायदर्शनम् – व्याख्या. चितनारायण पाठक, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९४
- न्यायमञ्जरी – सम्पा. श्री गौरीनाथशास्त्री, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, १९८३
- कारिकावली – व्याख्या. श्रीसूर्यनारायणशुक्लः, चौखम्बा संस्कृत सीरीज अफिस, वाराणसी, २०६५-विक्रमाब्दः
- तर्कसंग्रहः – व्याख्या. श्रीकृष्णवल्लभाचार्यः, चौखम्बा विद्याभवन, वाराणसी, २००३
- तर्कभाषा – व्याख्या- गजाननशास्त्री मुसलगाँवकर, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९८४


[7] तर्कसंग्रहः, अनुमानप्रकरणम्।

[8] तर्कभाषा, अनुमानप्रकरणम्।

[9] तत्त्वचिन्तामणि, अनुमानप्रकरणम्।